# 2020

## SANSKRIT — HONOURS

**Paper : CC-1**

**(Classical Sanskrit Literature-Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

**(Marks : 10)**

**Unit - II**

1. रघुवंशमहाकाव्यस्य प्रथमसर्गमनुसृत्य राज्ञः दिलीपस्य चारित्रिकं वैशिष्ट्यं यथापाठ्यं विव्रियताम्। 10

***अथवा,***

अधोलिखितेषु ***द्वयोः*** आङ्गलभाषया मातृभाषया वा अनुवादः कार्यः। 2×5

(क) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।

(ख) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः।।

(ग) प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।।

### Section - B

**(Marks : 20)**

**Unit - I**

2. कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गे विधृतायाः पार्वत्या समाचरितायाः तपस्यायाः वर्णनं कृत्वा तथाविधतपश्चरणस्य कारणमपि लिख्यताम्। 10

**Please Turn Over**

***अथवा,***

(क) अधोलिखितयोः कस्यचि***देकस्य*** आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः। 5

(अ) अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा।
प्रजासु पश्चात् प्रथितं तदाख्यया
जगाम गौरीशिखरं शिखण्डिमत्॥

(आ) अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः।
यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनाममिमीतलोचने॥

(ख) अधोलिखितयोः कस्य***चिदेकस्य*** भावः सम्प्रसार्यताम्। 5

(अ) पङ्कजं सशैवलासङ्गमपि प्रकाशते।

(आ) प्रियेषु सौभाग्यफला हि चारुता।

## Unit - II

**3.** (क) अधोलिखितयोः यथाभिमत***मेकस्य*** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गं व्याख्या कार्या। 7

(अ) स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियम्बदां
वदन्त्यपर्णेति च तां पुराविदः॥

(आ) तथातितप्तं सवितुर्गभस्तिभि-
र्मुखं तदीयं कमलश्रियं दधौ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैः शनैः श्यामिकया कृतं पदम्॥

(ख) अधोलिखितेषु ***त्रयाणा***मुत्तरं लेखनीयम्। तेषु न्यूनतया ***द्वयोः*** उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्। 1×3

(अ) कस्मिन् विषये केषां वयः जनैः न समीक्ष्यते?

(आ) कीदृश आसीत् पार्वत्याः पारणाविधिः?

(इ) ''निकाम विविधेन वह्निना''– अत्र विविधशब्देन कतिविधा अग्नयः सूचिताः?

(ई) पार्वत्याः वपुः कीदृशपद्मनिर्मितत्वेनोत्प्रेक्षितं कविना?

(उ) ''विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा'' – अत्र प्रथमाश्रमशब्दस्यार्थः कः?

## Section - C
## (Marks : 20)
## Unit - I

4. किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गे वनेचरस्य उक्तिषु प्रतिविम्बिता दुर्योधनस्य राज्यशासन-पद्धतिः संस्कृतभाषया देवनागरलिप्या च लेखनीया। 10

***अथवा,***

(क) अधोलिखितयोः यथे***च्छमेकस्य*** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गं व्याख्या कार्या। 5

(अ) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः।।

(आ) अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग् विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायती-
रुपेत्य सङ्घर्षमिवार्थसम्पदः।।

(ख) अधोलिखितयोः कस्यचि***देकस्य*** संस्कृतभाषया देवनागरलिप्या च भावः सम्प्रसार्यताम्। 5

(अ) हितं मनोहारि च दुर्लभं वचः।

(आ) वरं विरोधोऽपि समं महात्मभिः।

## Unit - II

5. अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं पूर्णवाक्येन संस्कृतभाषया देवनागरलिप्या च लेखनीयम्। 2×5

(क) के प्राणविनिमयेनापि कस्य प्रियकार्याणि कर्तुमिच्छन्ति?

(ख) दुर्योधनः कं यौवराज्ये नियुज्य किमकरोत्?

(ग) कस्य पराक्रममनुस्मृत्य दुर्योधनः व्यथितोऽभवत्?

(घ) दुर्योधनस्य राजत्वकाले कुरुदेशः देवभातृकः अदेवमातृको वा अभवत्?

(ङ) ''विधीयतां तत्र विधेयमुत्तमम्'' – केन कं प्रति च इदमुक्तम्?

(च) शत्रुरहितस्यापि दुर्योधनस्य कथमासीत् युधिष्ठिराद् भीतेराशङ्का?

(छ) दुर्योधनस्य ईहितं कथं ज्ञायते?

## Section - E
## (Marks : 15)
## Unit - I & II

6. अधोलिखितेषु ***विषयत्रयम***वलम्ब्य टीका लेखनीया। 5×3

(क) मेघदूतम्

(ख) अश्वघोषः

(ग) भारविः

(घ) गीतगोविन्दम्

(ङ) श्रीहर्षः

---